C

**SUMMATIVE ASSESSMENT- III - 2025-26 ( MODEL)**

First Language Part I- Paper-I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools)

**Time 1 ½ Hours** | **Class- X**

**Cool of time - 15. Minutes** | **Max Score - 40**

**निर्देशाः -**

- 15 निमेषाः समाश्वासकालः।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**भागः - 1**

**1. अधोदत्तेभ्यः गणेभ्यः समानार्थकं गणं चित्वा लिखत।** **(1)**

**क)** मूढः - पण्डितः। **ख)** तृष्णा - अभिलाषः।

**ग)** सन्तः - दुष्टाः। **घ)** विमुखः - समर्थः।

**2. अधोदत्तपट्टिकां पठित्वा उचितरूपेण युक्तं गणं चित्वा लिखत।** **(1)**

| | |
|---|---|
| **१.** वेदम् | **अ)** कठम्। |
| **२.** वेदाङ्गम् | **आ)** यजुः। |
| **३.** उपनिषद् | **इ)** ज्योतिषम्। |
| | **ई )** तत्वमसि। |

**क)** १- आ २. - अ ३. - ई

**ख)** १- इ २. - अ ३. - ई

**ग)** १- आ २. - इ ३. - अ

**घ)** १- ई २. - इ ३. - आ

**3. प्रस्तावनाद्वयं पठत। अधोदत्तेभ्यः साधु उत्तरं किमिति लिखत।** **(1)**

१. ज्योतिषं वेदाङ्गं भवति ।

२. बृहदारण्यकम् उपनिषद् भवति।

**क)** १ साधु।

**ख)** २ साधु।

**ग)** १ , २ असाधु।

**घ)** १ , २ साधु।

© STATE ASSESSMENT CELL - SCERT KERALA

4. **प्रस्तवनां कारणं च पठित्वा उचितमुत्तरं चित्वा लिखत।** **(1)**

प्रस्तावना - बालाय मोदकं रोचते।

कारणम् - रोचते इत्यस्य प्रयोगे कर्ता चतुर्थीविभक्तौ भवति।

**क)** प्रस्तावना साधु कारणम् असाधु । **ख)** प्रस्तावना असाधु कारणं साधु।

**ग)** प्रस्तावना कारणं च असाधु । **घ)** प्रस्तावना कारणं च साधु ।

## भागः - 2

5. **सुभाषितानुसारम् उचितम् अशयं चित्वा लिखत।** **(2)**

यदस्ति नास्तीति य एष संशयः
परस्य वाक्यैर्न ममात्र निश्चयः।
अवेत्य तत्त्वं तपसा शमेन च
स्वयं ग्रहिष्यामि यदत्र निश्चितम्॥

**क)** स्वप्रयत्नेन किं सत्यम् इति ज्ञात्वा तदेव स्वीकरणीयम्।

**ख)** विचिन्त्य एव गुणदोषविवेचनं करणीयम्।

**ग)** विचारेण विना कृतं कर्म आपदां कारणं भवति।

6. **(I) उचितपदानि स्वीकृत्य वाक्यं परिवर्तयत।** **(2)**

**( गायन्, क्रीडन्, वदन् )**

**क)** राजेशः गीतं गायति। सः नृत्यति।

**ख)** हक्किम् उच्चैः वदति। सः गृहं गच्छति।

**अथवा**

**(II) उचितपदानि स्वीकृत्य वाक्यं परिवर्तयत।**

**( गत्वा, विलिख्य, पठितुम् )**

**क)** लता गृहं गच्छति। सा पुस्तकं पठति।

**ख)** हारिफ् कवितां विलिखति। सः निद्रां करोति।

7. **अधोदत्तस्य पदच्छेदस्य संश्लिष्टपदम् उपयुज्य वाक्यं पूरयत ।** **(2)**

**क)** अचिरात् + एव।

**ख)** पुनः + आगच्छति।

शाण्डिल्यः अज्जुकायाः समीपं गत्वा............. गुरोः समीपं ...............।

8. **अधोदत्तं वाक्यं पठित्वा अत्र प्रवर्तमानम् उचितं न्यायं लिखत** **(2)**

**[ गुडगुलिकान्यायः, सिंहावलोकनन्यायः, नीरक्षीरन्यायः ]**

**क)** अध्यापिका विविधक्रीडाद्वारा गणनं पाठयति ।



© STATE ASSESSMENT CELL - SCERT KERALA

**ख)** माता फलापणं गत्वा विविधेभ्यः फलेभ्यः पक्वं फलं स्वीकरोति।

**9. श्लोकं पठित्वा गद्यक्रमं लिखत।** **(2)**

स्वसुर्विदर्भाधिपतेस्तदीयो
लेभेऽन्तरं चेतसि नोपदेशः।
दिवाकरादर्शनबद्धकोशे
नक्षत्रनाथांशुरिवारविन्दे॥

**गद्यक्रमः** - विदर्भाधिपतेः स्वसुः ............ तदीयः ..................दिवाकरादर्शनबद्धकोशे ........... नक्षत्रनाथांशुः इव ................. न लेभे।

**10. निर्देशानुसारं लिखत।** **(3)**

**एकपदं लिखत।**

**क)** कलिन्दात् प्रभूता - ............................।

**ख)** नवश्च असौ पयोदः च - ............................।

**विग्रहवाक्यं लिखत।**

**ग)** प्रख्यातः - ..........................।

**11. निर्देशानुसारम् उत्तरं लिखत।** **(3)**

**क) पट्टिकां पूरयत।**

| **रूपकं** | **ग्रन्थः** | **ग्रन्थकारः** |
|---|---|---|
| प्रकरणम् | मृच्छकटिकम् | ........................ |
| ........................ | पञ्चरात्रम् | भासः |

**ख)** मध्यमव्यायोगः कस्मिन् रूपकविभागे अन्तर्भवति ?

**12. श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।** **(4)**

गच्छन् पिपीलको याति
योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि
पदमेकं न गच्छति ।।

**क)** श्लोकात् 'गरुडः' इत्यर्थकं पदं चित्वा लिखत।

**ख)** श्लोके प्रयुक्तं एकं क्रियापदं लिखत।

**ग)** श्लोकस्य आशयं स्ववाक्यैः लिखत।

© STATE ASSESSMENT CELL - SCERT KERALA

**13. प्रादेशिकभाषया अशयानुसारं विवर्तयत ।** (4)

उत्तरकेरले प्रचाल्यमानम् अनुष्ठानकलारूपं भवति 'तिरयाट्टम्' । इदं कलारूपं वेल्लाट्ट्, तिरयाट्ट् चेति द्विधा विभक्तम् । अस्मिन् कलारूपे 'भगवतितिरा' अत्यधिकं प्राधान्यम् अर्हति। चेण्डा, इलत्तालम्, तुटिः, कुऴल् इत्यादीनि वाद्योपकरणानि कलारूपेऽस्मिन् उपयुज्यन्ते ।

**14. (I) सूचनानुसारं जीवनचरितं लिखत ।** (4)

| | | |
|---|---|---|
| नाम | - | वटक्के कूट्टाल नारायणन्कुट्टि नायर् |
| जन्म | - | 1929 ऐप्रिल् 7 तृश्शूर् |
| तूलिकानाम | - | वि. के. एन् |
| प्रशस्तिः | - | साहित्यकारः |
| कृतयः | - | आरोहणम् , पय्यन् कथकल् इत्यादीनि |
| पुरस्कारः | - | केन्द्रसाहित्यअक्कादमीपुरस्कारः, केरलसाहित्यअक्कादमीपुरस्कारः |
| मृत्युः | - | 2004 जनुवरि 25 |

**अथवा**

**(II) पद्यं पठित्वा आस्वादनटिप्पणीं लिखत ।**

वनशिलातलमेत्य तारापथं वीक्ष्य
मृगकुलाधीशस्य घनगर्जनम् ।
बर्हिणां नर्तनं नवमेघवर्षणं
वनतलं सर्वत्र घोषपूर्णम् ॥

**श्रद्धेयाः अंशाः -** प्रकृतिः- वनम् - सिंहगर्जनम्- मयूरनर्त्तनम् - वृष्टिः- शब्दमुखरितम् ।

**15. (I) होर्त्तूस् मलबारिक्कूस् इति ग्रन्थमधिकृत्य लघुटिप्पणीं लिखत ।** **(4)**

**श्रद्धेयाः अंशाः -** केरलीयसस्यविज्ञानं - हेन्ड्रिक् वान् रीड् - इट्टि अच्युतन् - सचित्रविवरणं- मलयाललिपिः- केरलीयचरित्रपठनम् ।

**अथवा**

**(II) पञ्चमहाकाव्यान्यधिकृत्य सूचनानुसारं टिप्पणीं लिखत ।**

**श्रद्धेयाः अंशाः -** काव्यभेदः - श्रव्यकाव्यानि - प्रसिद्धाः संस्कृतकवयः - पञ्चमहाकाव्यानि - तेषां कर्तारः ।

© STATE ASSESSMENT CELL - SCERT KERALA

**16. (I) खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **(4)**

महाकविना कालिदासेन विरचितं प्रथमसंस्कृतनाटकं भवति मालविकाग्निमित्रम्। अस्मिन् नाटके पञ्च अङ्काः सन्ति। अग्निमित्र-मालविकयोः प्रणयकथा एव कथातन्तुः। श्रृङ्गार एव मुख्यरसः। ए. आर्. राजराजवर्मा नाटकमिदं कैरल्याम् अनूदितवान्।

**क)** मालविकाग्निमित्रम् नाटकं केन विरचितम्?

**ख)** अस्य नाटकस्य कैरलीविवर्त्तनम् केन कृतम्?


**घ)** मालविकाग्निमित्रनाटके मुख्यरसः कः?

**ग)** विवर्त्तनम् इत्यस्य समानार्थकं पदं चित्वा लिखत।


**अथवा**

**(II) विशेषणविशेष्यानि उपयुज्य वाक्यं विपुलीकुरुत।**

**उदा-** [ कमलस्य लावण्यम् रीना सुन्दरस्य आस्वदते।]




**क)** [ गच्छन्ति नाटकं आस्वादकाः हास्यरसप्रधानं द्रष्टुं ]



** ** **

© STATE ASSESSMENT CELL - SCERT KERALA